Total No. of Questions : 12 Total No. of Printed Pages : 2

Code No : S-02

Samskrita Examination - 2012

साहित्यम् - SAHITYA

Group - I

Paper II - Gadya Kavya and Champu Kavya

गद्यकाव्यं चम्पूकाव्यं च

Date : 04.02.2012

Time : 2:00 PM - 5:00 PM Max. Marks :100

**I. संस्कृतभाषया उत्तरं लिखत (पञ्चानामेव) ।** 5 X 2 = 10

१. युधिष्ठिरः गन्धर्वैः विगृहीतं दुर्योधनं किमुक्त्वा स्वयं विमोच्य विससर्ज ?

२. यौवनारम्भे बुद्धिः किमुपयति ?

३. भैरवमन्दिरस्य यदुरायकृष्णराययोः समीपमागतः तपस्वी कः ?

४. समुत्पन्नेन काव्यपुरुषेण उक्ता छन्दस्वती वाक् का ?

५. दुर्वाससा सरस्वत्यै दत्तः शापः कः ?

६. हनूमतः छायां का अबोधयत् ?

७. भोजकवेः रीत्या चम्पूकाव्यलक्षणं किम् ?

**II. एतेषु पञ्चैव सप्रसङ्गं व्याख्यात ।** 5 X 4 = 20

१. वृथा निर्विण्णो मा भूः ।

२. महतीयं खलु अनर्थपरम्परा ।

३. दत्तमिदं प्राज्यं राज्यं भवते ।

४. द्वे शीर्षे सप्तहस्तासोऽस्य ।

५. शीर्षच्छेद्योऽयं दुरात्मा पाण्डवद्विट् ।

६. मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।

**III. एतेषु सावतरणं व्याख्यात ।** 2 X 5 = 10

१. एषा राक्षससार्वभौमनगरी रक्षश्चमूरक्षिता
तस्येदं सुवर्णशिखरं बिभ्राणमभ्रावलीम् ।
एतत्पुष्पकमाहृतं धनपतेरित्यादरान्मारुतेः
तत्रादर्शयदिन्दुदीपकिरणप्रद्योतिताशा निशा ॥

२. व्यत्यस्तकौस्तुभमवप्लुतवैजयन्ति
विस्रंसमानकनकाम्बरलोभनीयम् ।
सद्यः फणीन्द्रशयनादुदतिष्ठदीशः
कैलासशैलशिखरादिव कालमेघः ॥

३. सर्वेषु वर्णेष्वपि दातुरस्मात्संप्राप्तवत्स्वार्थमजातशत्रोः ।
नञ्वर्ण एकस्तु कदापि लेभे नार्थं क्रतूनामिह सार्वभौमे ॥

**IV. गद्यभागमिमं पठित्वा निम्नान् प्रश्नान् उत्तरयत ।** **5 X 1 = 5**

इत्थंकारं रहसि कल्पिते कैतवदुरध्वे तावुभावप्यधावितुं दिव्यचक्षुषा तेनान्धेन वसुन्धराधिपतिना नवमणिमण्डपिप्रवेशोत्सवव्याजादाहूतः सानुजो धर्मजः कुरुपत्तनमुपेत्य बन्धुतया प्रत्युद्गम्यमानो दुस्तरं भाविवनवासवर्षमेकैकमेकैकेन प्रणिपातपुण्येन सुप्रतरं करिष्यन्निव पितृव्यं द्वादशकृत्वः पादयोः प्रणंसीत्।

१. रहसि किं कल्पितम् ?
२. धर्मजः केन व्याजेन आहूतः ?
३. धर्मजं कः आहूतवान् ?
४. धर्मजः कम् उपेतवान् ?
५. पितृव्यं कतिवारं धर्मजः प्रणंसीत् ?

**V. एषु त्रयाणामेव समासं स्फुटीकृत्य विग्रहवाक्यानि लिखत ।** **3 X 2 = 6**

१. प्रथमानवेगः । २. पञ्चबाणी । ३. उपतटम् । ४. निरवद्यशीला ।

**VI. इमानि यथोचितं लिखत ।** **5 X 1 = 5**

| अ | आ |
|---|---|
| १. सीता | (अ) भोजः । |
| २. यदुवंशराज्यप्राप्तिः | (आ) चामुण्डी गिरिः । |
| ३. सव्यसाची | (इ) जग्गुवकुलभूषणः । |
| ४. महाबलपर्वतः | (ई) अर्जुनः । |
| ५. चम्पूरामायणम् | (उ) जाह्नवी |

**VII. एषां पदानाम् अर्थं लिखत ।** **5 X 1 = 5**

१. पुरोधस् । २. पिशितम् । ३. पलाशः । ४. शिलीमुखः । ५. धार्तराष्ट्रः ।

**VIII. एतैः वाक्यानि रचयत ।** **5 X 1 = 5**

१. अवाप । २. धेनुः । ३. यथा - तथा । ४. कविः । ५. सर्वेषु ।

**IX. एतेषु विषयद्वयमधिकृत्य टिप्पणीं लिखत ।** **2 X 3 = 6**

१. मारुतिः । २. दुर्योधनः । ३. काव्यपुरुषः ।

**X. एषु वाक्येषु विद्यामानान् अलङ्कारान् स्फुटयत ।** **2 X 5 = 10**

१. सीतालतायास्त्रिजटा जटाभूत् ।
२. नक्तं दिवं दहति चित्तमिदं यतो मे ।

**XI. जागृ धातोः लट् रूपाणि विलिखत ।** **5**

**XII. इमान् संस्कृतकर्णाटकभाषयोः यथारुचि उत्तरयत ।**

१. ऐश्वर्येण के के अनर्थाः भवन्ति ? 4
२. बाणभट्टभोजराजयोः अन्यतरस्य देशकालकृतीरधिकृत्य प्रबन्धं विलिखत । 5
३. सावित्रीं वर्णयत । 4

* * * *